# 18. बिलस्य वाणी न कदापि मे श्रुता

[संस्कृतसाहित्यनी अनुपम कृति मनाता अने विश्वभरमां जाणीता बनेला पंचतंत्र नामना कथा-ग्रंथमांथी प्रस्तुत कथा लेवामां आवी छे. पंचतंत्रना कर्ता विष्णुशर्मा छे. तेमणे अमरशक्ति नामना राजाना पुत्रोने मात्र छ मासना समयगाळामां राजनीतिमां निपुण बनावववा माटे आ ग्रंथ रच्यो हतो. आमां मित्रभेदः, मित्रप्राप्तिः, काकोलूकीयम्, लब्धप्रणाशः अने अपरीक्षितकारकम् एम पांच तंत्र (प्रकरण) आवेलां छे. आ कारणे आ ग्रंथनुं नाम पंचतंत्र छे.

दरेक तंत्रना प्रारंभे प्रथम एक कथानी मांडणी कराय छे अने पछी तेनी पेटा कथाओ तरीके अनेक कथाओ आवती रहे छे. गद्य अने पद्य ए बंने शैलीमां रचायेली नानी नानी सरस प्राणीकथाओनी अद्‌भुत संकल्पना आ ग्रंथमां छे. दरेक कथामां माणसनुं बुद्धिचातुर्य वधे, तेनो खास ख्याल राखवामां आव्यो छे. कथानी अंतर्गत कोई एक विषयना अनुकूळ तेमज प्रतिकूळ बंने पक्ष सामे धरीने कथावस्तुने आगळ वधारवामां आवी छे. कथाकथननी आ विशिष्ट शैलीने कारणे मनोरंजननी साथे साथे जीवनमां उपयोगी एवो अमूल्य उपदेश पण वाचकने प्राप्त थतो रहे छे.

आवनारी आपत्तिनी जाण अने ते पछी तेमांथी बचवानो उपाय शीखवती आ कथानो अभ्यास करती वखते अहीं वपरायेलां अव्ययपदोनो पण अभ्यास करीशुं.]

कस्मिंश्चित् वने खरनखरः नाम सिंहः प्रतिवसति स्म । सः कदाचित् इतस्ततः परिभ्रमन् क्षुधार्तः न किञ्चिदपि आहारं अलभत । ततः सूर्यास्तसमये एकां महतीं गुहां दृष्ट्वा सः अचिन्तयत् – ''नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति । अतः अत्रैव निगूढो भूत्वा तिष्ठामि'' इति ।

एतस्मिन् अन्तरे गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत् । स च यावत् पश्यति तावत् सिंहपदपद्धतिः गुहायां प्रविष्टा, न च बहिरागता अपश्यत् । शृगालः अचिन्तयत् – ''अहो विनष्टोऽस्मि । नूनम् अस्मिन् बिले सिंहः अस्तीति तर्कयामि । तत् किं करवाणि ?'' एवं विचिन्त्य दूरस्थः रवं कर्तुमारब्धः – ''भो बिल ! भो बिल ! किम् न स्मरसि यन्मया त्वया सह समयः कृतोऽस्ति यत् यदाहं बाह्यतः प्रत्यागमिष्यामि तदा त्वं माम् आकारयिष्यसि ? यदि त्वं मां न आह्वयसि तर्हि अहं द्वितीयं बिलं यास्यामि इति ।''



अथ एतच्छ्रुत्वा सिंहः अचिन्तयत् – 'नूनमेषा गुहा स्वामिनः सदा समाह्वानं करोति । परन्तु मद्भयात् न किञ्चित् वदति । तदहम् अस्य आह्वानं करोमि । एवं सः बिले प्रविश्य मे भोज्यं भविष्यति ।' इत्थं विचार्य सिंहः

सहसा शृगालस्य आह्वानमकरोत् । सिंहस्य उच्चगर्जनस्य प्रतिध्वनिना सा गुहा उच्चैः शृगालम् आह्वयत् । अनेन अन्येऽपि पशवः भयभीताः अभवन् । शृगालोऽपि ततः दूरं पलायमानः इममपठत् –

**अनागतं यः कुरुते स शोभते**
**स शोच्यते यो न करोत्यनागतम् ।**
**वनेऽत्र संस्थस्य समागता जरा**
**बिलस्य वाणी न कदापि मे श्रुता ।।**

## टिप्पणी

**नाम : (पुंल्लिंग) :** (खरनखरः એ नाम छे.) **क्षुधार्तः** ભૂખથી પીડાયેલ, ભૂખ્યો, **जीवः** પ્રાણી, જીવ **निगूढः** સંતાયેલ, છુપાયેલ (दधिपुच्छः એ શિયાળનું નામ છે.) **शृगालः** શિયાળ, **रवः** ધ્વનિ, અવાજ, **समयः** શરત, નિયમ.

**(स्त्रीलिंग) : गुहा** ગુફા, **सिंहपदपद्धतिः** સિંહનાં પગલાંની છાપ-નિશાની **प्रतिध्वनिः** પડઘો **जरा** વૃદ્ધાવસ્થા, ઘડપણ.

**(नपुंसकलिंग) : बिलम्** દર **भयम्** ભય, ડર.

**सर्वनाम : एतस्याम्** આમાં (સ્ત્રીલિંગ) **एतस्मिन्** આમાં (પુંલ્લિંગ) **अस्मिन्** આમાં (પુંલ્લિંગ) **मया** મારા થકી, મારા વડે, મારાથી **त्वया** તારા થકી, તારા વડે, તારાથી **माम्** મને **एषा** આ (સ્ત્રીલિંગ) **अस्य** આનું **अनेन** આના થકી, આના દ્વારા, આનાથી **अन्ये** બીજાઓ (પુંલ્લિંગ) **इमम्** આને (પુંલ્લિંગ) **मे** મારું (આ मम ષષ્ઠી એકવચનનું વૈકલ્પિક રૂપ છે. તે ક્યારેય વાક્યની શરૂઆતમાં આવતું નથી.)

**विशेषण : दूरस्थ** દૂર રહેલું **कृत** કરેલું **द्वितीय** બીજું **अनागत** આવ્યું ન હોય તેવું, આવનારું.

**अव्यय : कस्मिंश्चित्** કોઈ એકમાં, કોઈક **किञ्चिदपि** કંઈક પણ, થોડું પણ **अत्रैव** અહીં જ **बाह्यतः** બહારની બાજુથી, બહારથી **यदा** જ્યારે **तदा** ત્યારે **इत्थम्** આ રીતે **सहसा** અચાનક **उच्चैः** ઊંચેથી, મોટેથી.

**समास :** क्षुधार्तः (क्षुधया आर्तः, तृतीया तत्पुरुष) । सूर्यास्तसमये (सूर्यस्य अस्तः सूर्यास्तः । सूर्यास्तस्य समयः सूर्यास्तसमयः, तस्मिन् । षष्ठी तत्पुरुष) । सिंहपदपद्धतिः (सिंहस्य पदानि सिंहपदानि । सिंहपदानां पद्धतिः सिंहपदपद्धतिः । षष्ठी तत्पुरुष) । भयभीताः (भयेन भीताः, तृतीया तत्पुरुष) अनागतम् (न आगतम् अनागतम्, नञ् तत्पुरुष)

**कृदन्तपद : दृष्ट्वा** (दृश् + त्वा) । **भूत्वा** (भू + त्वा) । **श्रुत्वा** (श्रु + त्वा) । **प्रविश्य** (प्र + विश् + त्वा > य) ।

**क्रियापद : प्रथम गण :** (પરસ્મૈપદ) **प्रति + वस्** (प्रतिवसति) વસવું, રહેવું **स्मृ** (स्मरति) સ્મરણ કરવું, યાદ કરવું **प्रति + आ + गम् – गच्छ्** (प्रत्यागच्छति) પાછા વળવું **आ + ह्वे – ह्वय्** (आह्वयति) બોલાવવું **पठ्** (पठति) ભણવું, પાઠ કરવો, વાંચવું.

(आत्मनेपद) **शुभ्** (शोभते) શોભવું.

**दशम गण :** (પરસ્મૈપદ) **तर्क्** (तर्कयति) અટકળ કરવી, કલ્પના કરવી, ધારવું.

## વિશેષ

**(1) शब्दार्थ : परिभ्रमन्** રખડતો, ભ્રમણ કરતો, ભટકતો **क्षुधार्तः** ભૂખ્યો, ભૂખથી પીડાતો **निगूढो भूत्वा** સંતાઈને, છુપાઈને **तर्कयामि** વિચારું છું. સમજું છું. **किं करवाणि** શું કરું ? **आकारयिष्यति** આવકારીશ. બોલાવીશ. **भोज्यम्** ખાવાનું ભોજન **आह्वानमकरोत्** આવાહન કર્યું. **उच्चगर्जनस्य** મોટી ગર્જનાના **पलायमानः** ભાગતો, નાસી જતો **कुरुते** કરે છે. **शोच्यते** શોકનું-ચિંતાનું પાત્ર બને છે. **संस्थस्य** રહેલાને, વસતાને **न कदापि मे श्रुता** મેં ક્યારેય સાંભળી નથી.

**(2) संधि :** इतस्ततः (इतः ततः) । कोऽपि (कः अपि) । अत्रैव (अत्र एव) । निगूढो भूत्वा (निगूढः भूत्वा) । बहिरागता (बहिः आगता) । विनष्टोऽस्मि (विनष्टः अस्मि) । यन्मया (यत् मया) । कृतोऽस्ति (कृतः अस्ति) । यदाहम् (यदा अहम्) । एतच्छ्रुत्वा (एतत् श्रुत्वा) । अन्येऽपि (अन्ये अपि) । शृगालोऽपि (शृगालः अपि) । करोत्यनागतम् (करोति अनागतम्)। वनेऽत्र (वने अत्र) ।

## स्वाध्याय

**1. विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) कीदृशः सिंहः वने इतः ततः परिभ्रमणम् अकरोत् ।

(क) तृषार्तः (ख) क्षुधार्तः (ग) भयार्तः (घ) निगूढः

(2) शृगालस्य नाम किम् आसीत् ।

(क) खरनखरः (ख) मदोन्मत्तः (ग) दीर्घपुच्छः (घ) दधिपुच्छः

(3) शृगालस्य गुहायां कः प्रविष्टः ।

(क) शृगालः (ख) सिंहः (ग) गजः (घ) शशकः

**2. एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

(1) सूर्यास्तसमये सिंहः किम् अपश्यत् ?

(2) शृगालः कस्य पदपद्धतिम् अपश्यत् ?

(3) शृगालस्य वचनं श्रुत्वा सिंहः किम् अकरोत् ?

(4) बिलस्य वाणी न कदापि मे श्रुता - इति वाक्यं कः वदति ?

**3. घटना-क्रमानुसारं वाक्यानि लिखत ।**

(1) शृगालः अपि ततः दूरं पलायमानः इमम् अपठत् ।

(2) क्षुधार्तः सिंहः किञ्चिदपि आहारं न अलभत ।

(3) इत्थं विचार्य सिंहः सहसा शृगालस्य आह्वानम् अकरोत् ।

(4) भो बिल ! भो बिल ! किं न स्मरसि ।

(5) अतः अत्रैव निगूढो भूत्वा तिष्ठामि ।

(6) यदि त्वं मां न आह्वयसि तर्हि अहं द्वितीयं बिलं यास्यामि ।

**4. कृदन्तप्रकारं लिखत ।**

(1) दृष्ट्वा ..... (2) भूत्वा ..... (3) विचिन्त्य .....

(4) कर्तुम् ..... (5) प्रविश्य .....

**5. स्म-प्रयोगेण क्रियापदानि परिवर्तयत ।**

(1) अचिन्तयत् (2) अगच्छत् (3) अपठत् (4) अवसत्

**6. समासप्रकारं लिखत ।**

(1) सूर्यास्तः (2) पदपद्धतिः (3) भयभीताः (4) गर्जनप्रतिध्वनिः

**7. मातृभाषया उत्तराणि लिखत ।**

(1) સાંજના સમયે ગુફાને જોઈને સિંહે શું વિચાર્યું ?

(2) ગુફાના સ્વામી શિયાળે ગુફા આગળ પગલાંની નિશાની જોઈને શું વિચાર્યું ?

(3) ગુફાથી દૂર રહીને શિયાળે ગુફાને કઈ શરત યાદ કરાવી ?

(4) આ વાર્તા પરથી શો બોધ મળે છે ?

(5) શિયાળે જતાં જતાં શું કહ્યું ?

**8. मातृभाषायाम् अनुवादं लिखत ।**

(1) अतः अत्रैव निगूढो भूत्वा तिष्ठामि ।

(2) नूनम् अस्मिन् बिले सिंहः इति तर्कयामि ।

(3) यदि त्वं मां न आह्वयसि तर्हि अहं द्वितीयं बिलं यास्यामि ।

(4) एवं सः बिले प्रविश्य मे भोज्यं भविष्यति ।

(5) अनेन अन्ये अपि पशवः भयभीताः अभवन् ।

(6) बिलस्य वाणी न कदापि मे श्रुता ।

**9. अव्ययपदानाम् अर्थं लिखत ।**

(1) यदा ..... (2) तथा ..... (3) कुत्र .....

(4) इतः ..... (5) सर्वदा .....

**प्रवृत्ति**

- કોઈ એક પ્રાણીકથાને તમારા શબ્દોમાં લખો.